॥ ॐ नमो भगवते वासुदेवाय ॥

# श्रीमद् भागवत रसिक कुटुंब

## श्री गणेश पंचरत्न स्तोत्र

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

॥ ॐ नमो भगवते वासुदेवाय ॥

# श्री गणेश पंचरत्न स्तोत्र

श्रीगणेशाय नमः ॥

मुदाकरात्तमोदकं(म्) सदाविमुक्तिसाधकं(ङ्),
कलाधरावतंसकं(म्)विलासिलोकरक्षकम् ।
अनायकैकनायकं(म्) विनाशितेभदैत्यकं(न्),
नताशुभाशुनाशकं(न्) नमामि तं(म्) विनायकम् ॥ 1॥

नतेतरातिभीकरं(न्) नवोदितार्कभास्वरं(न्),
नमत्सुरारिनिर्जरं(न्) नताधिकापदुद्धरम् ।
सुरेश्वरं(न्) निधीश्वरं(ङ्) गजेश्वरं(ङ्) गणेश्वरं(ङ्),
महेश्वरं(न्) तमाश्रये परात्परं(न्) निरन्तरम् ॥ 2॥

समस्तलोकशङ्करं(न्) निरस्तदैत्यकुञ्जरं(न्),
दरेतरोदरं(म्) वरं(म्) वरेभवक्त्रमक्षरम् ।
कृपाकरं(ङ्) क्षमाकरं(म्) मुदाकरं(म्) यशस्करं(म्),
मनस्करं(न्) नमस्कृतां(न्) नमस्करोमि भास्वरम् ॥ 3॥

अकिञ्चनार्तिमार्जनं(ञ्) चिरन्तनोक्तिभाजनं(म्),
पुरारिपूर्वनन्दनं(म्) सुरारिगर्वचर्वणम् ।
प्रपञ्चनाशभीषणं(न्) धनञ्जयादिभूषणं(ङ्),
कपोलदानवारणं(म्) भजे पुराणवारणम् ॥ 4॥

नितान्तकान्तदन्तकान्तिमन्तकान्तकात्मजं(म्),
अचिन्त्यरूपमन्तहीनमन्तरायकृन्तनम् ।
हृदन्तरे निरन्तरं(म्) वसन्तमेव योगिनां(न्),
तमेकदन्तमेव तं(म्) विचिन्तयामि सन्ततम् ॥ 5 ॥

महागणेशपञ्चरत्नमादरेण योऽन्वहं(म्),
प्रजल्पति प्रभातके हृदि स्मरन् गणेश्वरम् ।
अरोगतामदोषतां(म्) सुसाहितीं(म्) सुपुत्रतां(म्),
समाहितायुरष्टभूतिमभ्युपैति सोऽचिरात् ॥ 6॥

इति श्रीशङ्करभगवतः(ख्) कृतौ श्रीगणेशपञ्चरत्नस्तोत्रं(म्) सम्पूर्णम् ॥